वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# वेदानां संरक्षणे विकृतिपाठानां योगदानम्

**डॉ. शत्रुघ्न पाणिग्राही***

वैदिकवाङ्मये ऋग्-यजु-साम-अथर्वभेदेन चत्वारो वेदाः सन्ति।[१] एषां चतुर्णां वेदानां पठनपाठनं गुरुपरम्परया प्राचीनकालादेव अविचलं प्रचलति। ऋषयो मन्त्रद्रष्टारः[२] इत्यनेन विज्ञायते यत् भगवतः सकाशात् आगताः वेदाः अपौरुषेयाः।[३] परन्तु ऋषयः मन्त्रान् योगशक्त्या संगृह्य गुरुपरम्परया अध्ययनाध्यापनञ्च प्रचालितवन्तः। कालक्रमे पुनर्वैयक्तिकी एषणा यदा आगता तथा च जनानां भौतिकं विषयजातं प्रति आसक्तिः सञ्जाता तदा मानवस्य चिन्तनपक्षः, विमर्शनियमः अभ्यासश्च सङ्कोचतां प्राप्तः। तदा वेदपाठस्य संरक्षणार्थं सम्यक्प्रयोगं विधातुं च ऋषयः उपायचिन्तनं प्रारब्धवन्तः। अनन्तरं तेषां वेदानां संरक्षणार्थं प्रत्येकस्मिन् वेदे पाठविभागाः कृताः ऋषिभिः। व्यासात्पैलः संहितापदक्रमं च त्रिविधरूपं पठित्वा इन्द्रप्रमितये ददौ। इन्द्रप्रमितिश्चतुर्धा जटान्तं व्यासं कृत्वा बाष्कलादि-अग्निमित्रान्त-षट्-शिष्येभ्यः स्वसुताय माण्डुकेयाय च ददौ। माण्डुकेयस्य शिष्यो वेदमित्रस्तस्य पुत्रेभ्यः सौभर्यादिभ्यः स्वसुताय शाकल्याय ददौ। शाकल्यः संहितापदक्रमजटादण्डरूपं च पञ्चधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोखल्यशिशिरेभ्यो ददौ।[४] अनेन प्रकारेण गुरुपरम्परया शाखाः आगताः। तत्रापि प्रकृतिविकृतिरूपं पारायणं द्विविधम्।[५] प्रकृतिपाठाः सन्ति- संहितापाठः, पदपाठः, क्रमपाठश्च। क्रमः

---

* सहाचार्यः, वेदविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।

[१] तेनासौ चतुरो वेदांश्चतुर्भिवदनैः प्रभुः।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविचक्षणा॥ भागवतपराणम्, १२.६.४३

[२] ऋषिर्मन्त्र-द्रष्टा। गत्यर्थत्वाद् ऋषेर्ज्ञानार्थत्वाद् मन्त्रं दृष्टवन्त ऋषयः।
श्वेतवनवासिरचितवृत्तिः उणादिसूत्र- ४/१२९

[३] "वाचा विरूप नित्यया" – ऋग्वेदः-८/७५/६
"अपौरुषेयं वेदः"। वेदान्तपरिभाषा, आगमपरिच्छेदस्य अन्तभागः
"अत एव च नित्यत्वम्" – ब्रह्मसूत्रम् -१/३/२९
"निजशक्त्यभिव्यक्तः स्वतः प्रामाण्यम्" – साख्यसूत्रम्- ५/५१

[४] आपस्तम्बगृह्यसूत्रम्-३/४ , भागवत – १२/६

[५] क्रमपारः, क्रमपदः, क्रमजटः, क्रमदण्डश्चेति चतुष्पारायणम् –चरणव्यूहसूत्रम् –ऋग्वेदखण्डः-६

संहितावाची कथम् इति प्रश्ने "पदप्रकृतिः संहिता"[६] इति नैरुक्तवचनात् क्रमः संहितारूपः। एषां त्रयाणां पाठानामनन्तरम् अष्टौ विकृतिपाठाः[७] विकसिताः जाताः, ये वेदानां संरक्षणे महत्त्वपूर्णं भूमिकां निर्वहन्ति।

वेदारम्भः संहितात् एव क्रियते। संहिताध्ययनान्तरं पदक्रमपाठस्यावसर आगच्छति। संहितापदक्रमपाठानन्तरं विकृतिपाठाः पठ्यन्ते। अष्टविकृतिभिः वेदपाठस्य संरक्षणं कथं भवति इति प्रश्ने उत्तरं भवति यत्- स्वरैः संरक्षणम्, संहिताभिः संरक्षणम्, पदपाठैः संरक्षणम्, क्रमैश्च तथा जटाद्याष्टविकृतिभिश्च वेदपाठस्य संरक्षणं कुर्वन्ति वैदिकाः। विकृतिपाठाः संहितायाः अविकृतस्वरूपरक्षायै पठ्यन्ते। एषां प्रवर्तको महर्षिव्याडिः। एषां पाठेन प्रत्यक्षरं प्रतिपदञ्च मन्त्रादीनां नैकवारं सन्ध्यवग्रहादिविघट्टनेन स्वरसमासादीनां लिङ्गानि पुरस्स्फुरन्तीव राजन्ते। अत एवाद्यापि वेदमन्त्रेषु न किमपि मिश्रणमवलोक्यते। सृष्टेः आदिकालादेव संहितापाठस्य सुरक्षायै अन्ये सर्वे पाठाः संरचिताः आसन्। वेदपाठे प्रत्येकं वेदस्य संहितापाठः आदौ गण्यते। तदनन्तरं पदक्रमविकृतिपाठाः प्रयुज्यन्ते।

अस्माकं पूर्वजाः वेदानुरागिणः नियमाधारेण सुनिश्चितं कृतवन्तः यत् मन्त्राणां पाठे गायने च मात्राणां स्वराणाम् अक्षराणाञ्च संरक्षणं भवेत्। तस्य पाठस्य लाभोऽपि प्राप्नुयात्। एतदर्थं मन्त्रस्य प्रत्येकवर्णोच्चारणे यावान् कालः अपेक्षते तत्सर्वमुचारणस्थानं तस्य कालश्च निर्धारितः कृतः महर्षिभिः विद्वद्भिश्च। तस्य सुनिश्चितस्य समयस्य भागः मन्त्र इति नाम्ना निगद्यते। वेदमन्त्राणां शुद्धस्वरूपस्योच्चारणे श्वासप्रश्वासप्रक्रियया शरीरस्य नियताङ्गेषु स्पन्दनस्य निर्माणं करोति। तस्य निर्माणस्य स्पन्दनस्य वैज्ञानिकः सिद्धान्तः शिक्षा इति नाम्ना ज्ञायते। वेदस्याङ्गं शिक्षा वर्णानां संज्ञाने महत्त्वपूर्णा वर्तते। मन्त्रेषु कतिपयचिह्नानि दृश्यन्ते, तानि वेदपाठस्य संरक्षणे महत्त्वपूर्णानि सन्ति। तानि चिह्नानि स्वर इति नाम्ना ज्ञायन्ते। मुख्यरूपेण त्रयः स्वराः सन्ति।[८] उदात्तानुदात्तस्वरितस्वरैः चिह्नैः वर्णानां पदानां च मात्रादीनां ज्ञानं सुनिश्चितं भवति। यदि यत्र कुत्रापि काचित् त्रुटिर्जायते तर्हि तेनोच्चारणेन स्वरेण विज्ञातुं शक्यते कुत्र त्रुटिर्जाता। गुरुपरम्परया गुरुमुखात् श्रवणेन शिरसा हस्तस्वरेण वा तस्य सङ्केतं विधाय पाठस्य संरक्षणं भवति।

---

[६] निरुक्तम् – पू.६ ख.१७ (प्रथमोऽध्यायः)

[७] जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ चरणव्यूहसूत्रम्- ऋग्वेदखण्डः

[८] उदात्तानुदात्तस्वरितभेदेन स्वरस्त्रिधा। सिद्धान्तकौमुदी, संज्ञाप्रकरणम्

## जटाविकृति:

अनया विकृत्या वेदपाठस्य संरक्षणं भवति। मन्त्रस्य पदानि संगृह्य क्रमव्युत्क्रमपद्धत्या पाठेन प्रत्येकं पदस्य सुरक्षा जायते। अस्या लक्षणं यथा –

**द्विपदादिक्रमा: पञ्च प्रक्रमाद्व्युत्क्रमात्तत:।**
**पुन: क्रमादुद्व्यदिता जटात्वं प्रापिता बुधै:॥**[९] इति।

उपर्युक्तेन लक्षणेन विज्ञायते यत् मन्त्रस्य पदानां यादृश: क्रम: स्यात् तं नियमं स्वीकृत्य क्रम-व्युत्क्रमनियमेन पाठं कुर्यात्। उदाहरणं यथा- पुनस्त्वा त्वापुन: पुनस्त्वा।[१०] जटानियमस्य चित्रणमित्थं भवितु मर्हति - १२,२१,१२। उदाहरणं दृष्ट्वा ज्ञातुं शक्यते यद् एकस्य पदस्य पुन: पुन: आवृत्तिं कृत्वा तस्य संरक्षणं भवति। तस्य पदस्य मात्रा, स्वर:, वर्णादयश्च तत्तुल्या: भवन्ति। येन मन्त्रभागस्य संरक्षणं जायते।

## मालाविकृति:

**ब्रूयात्क्रमविपर्यासानर्धर्चस्यादितोऽन्तत:।**
**अन्तश्चादिन्नयेदेवं क्रममालेति गीयते ॥**
**माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा।**
**आवर्त्तते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमा: ॥**[११] इति।

क्रमक्रमव्युत्क्रमाभ्याम् अर्धर्चस्य आदित: अन्ततो व्युत्क्रमोपक्रममिति विशेषो भवति। एवं क्रमविपर्यासाभ्यां क्रमं ब्रुवन् पुमान् आदित: आरभ्य क्रमं समानं समाप्तिं नयेत्। अन्तमन्तत आरब्धं क्रमम् आदित: समाप्तिं नयेत्। अत्र मन्त्रस्य आदित: पदद्वयं च गृहीत्वा मालां संरचेत्। उदाहरणं यथा - यज्ञेनयज्ञम्। आसन्नित्यासन्। यज्ञमयजन्त। आसन्प्रथमानि। अयजन्तदेवा:। प्रथमानिधर्माणि। इति।[१२]

## शिखाविकृति:

**पदोत्तरां शिखामेव जटायाम: प्रचक्षते।**
**आर्या: पदोत्तरसंक्रमा जटां शिखां प्रवदन्ति ॥**[१३] इति।

---

[९] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि-३

[१०] शुक्लयजुर्वेद: - १२/४४, सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[११] चरणव्यूहसूत्रम् – प्रथम: खण्ड-३-४

[१२] शुक्लयजुर्वेद: - ३१/१६, सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[१३] शुक्लयजुर्वेद: - ३१/१६,सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

शिखाविकृतौ जटावत् क्रमं स्वीकृत्य व्युत्क्रमं नयेत्, तदनन्तरम् एकं पदम् उत्तरस्मात् स्वीकर्तव्यम्। उदाहरणं यथा - श्रीश्चचश्री: श्रीश्चते। चतेतेचचतेलक्ष्मी:।[१४] तन्नियमस्य चित्रणमित्थं भवितुमर्हति - १२, २१, १२३। अनेन विज्ञायते यत् एकं पदं उत्तरत: स्वीकृत: पूर्वस्मात् त्यजेत्।

## रेखाविकृति:

**क्रमाद्द्वित्रिचतु:पञ्चपदक्रममुदाहरेत्।**
**पृथक् पृथक् विपर्यस्य रेखामाहु: पुन: क्रमात् ॥**[१५] इति।

क्रमात्, अनुक्रमात्, द्वित्रिचतुःपञ्चपदक्रमम् संगृह्य प्रत्येकं प्रत्येकं विपर्यस्य क्रमादुदाहरेत्। एवमुक्त्वा विकृतिन्नाम रेखां प्रचक्षते। उदाहरणं यथा - बृहस्प्पतेपरि। परिबृहस्प्पते। बृहस्प्पतेपरि। परिदीयारथेन। रथेनदीयापरि।[१६] द्विचतु: पदे स्वीकृत्य विपर्यासः कृतोऽस्ति। अनेनापि वेदपाठस्य संरक्षणं भवति।

## ध्वजविकृति:

**भूयादादे: क्रमं सम्यग्गन्तादुच्चारयेदिति।**
**वर्गे च ऋचि वा यत्र पठनं स ध्वज: स्मृत: ॥**[१७] इति।

अनेन ज्ञायते यत् आदे: क्रमात् प्रारभ्य अन्तोच्चारणं सम्यक् करणीयम्। एकमेकं पूर्वं पूर्वं पदं अन्तोपान्त्यादिक्रमपूर्वे अनुक्रमेण आवर्तनीयम्। उदाहरणं यथा - बृहस्प्पतेपरि। रथानामितिरथानाम्। परिदीय। अवितारथानाम्। दीयपरि। एद्ध्यविता। रथेनरक्षोहा। अस्माकमेधि। रक्षोहामित्रान्। अत्र बृहस्प्पतेपरि इति आदिक्रम: वर्तते। रथानामितिरथानाम् इति अन्तक्रम: अस्ति। इत्यत्र मन्त्रस्य प्रारम्भात् आरभ्य मन्त्रस्य अन्तादपि आनयेत्। अनेन मन्त्रस्य आद्यन्तज्ञानेन वेदपाठस्य संरक्षणं भवति।

## दण्डविकृति:

**क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम्।**
**अर्द्धर्चादेवमुक्त्वोऽयं क्रमदण्डोऽभिधीयते ॥**[१८] इति।

पुनश्च आदित: आरभ्य क्रममुच्चरेत्। एवं पूर्वार्धर्चक्रमसम्बन्धत्वेन उत्तरार्द्धर्चं क्रममुक्त्वा पूर्वार्धं

---

[१४] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[१५] चरणव्यूहसूत्रम्- ऋग्वेदखण्डः - ६

[१६] शुक्लयजुर्वेद: - १७/३६, सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[१७] चरणव्यूहसूत्रम्- ऋग्वेदखण्डः -७

[१८] चरणव्यूहसूत्रम् – ऋग्वेदखण्ड:-२

चादिपदपर्यन्तं विपर्यासेन संहितां पठेत्। उदाहरणं यथा- ताऽउभौ। उभौतौ। ताऽउभौ। उभौचतुर:। चतुरऽउभौतौ। ताऽउभौ। उभौ चतुर:। चतुर: पद:। इति।[१९]

## रथविकृति:

**पादशोऽर्द्धर्चशो वाऽपि सहोक्त्वा दण्डवद्रथ:।**
**ऋचोर्धर्चयो: पदयोर्दण्डवत् संहितापदक्रमै: ॥**[२०] इति।

सहोक्त्वा रथो विहितो भवतीत्यर्थ:। सहोक्तिरेव रथ इति यावत्। चतुष्पाद्रथ:। उदाहरणं यथा – स्वस्तिन:। स्वस्तिन:। स्वस्तिन:। स्वस्तिन:। न:स्वस्ति। न:स्वस्ति। न:स्वस्ति। न:स्वस्ति। इति।[२१]

## घनविकृति:

**अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत्।**
**आदिक्रमं नयेदन्तं घनमाहुर्मनीषिण: ॥**[२२] इति।

विकृतिरियं वेदपाठस्य सम्यक् प्रकारेण संरक्षणं करोति। अत्र क्रमस्य आदित: अन्तपर्यन्तं पुन: अन्तत: आदिपर्यन्तं नयेत्। एवं प्रकारेण एकम् एकं पदं विहाय उत्तरोत्तरं योजयित्वा घनपाठो भवति। पदानामुपरि अङ्कान् लिखित्वा घनपाठस्य रचना कर्तुं शक्यते। घनसूत्रस्य चित्रणमित्थं भवितुमर्हति - १-२ / २-१ / १-२ / २-३ / ३-२ / १-१ / २-३। उदाहरणं यथा "गणानान्त्वात्वागणानाङ्ग-णानान्त्वागणपतिङ्गणपतिन्त्वागणानाङ्गणानान्त्वागणपतिम्"।[२३]

अष्टविकृतिमाध्यमेन वेदपाठस्य संरक्षणं समीचीनरूपेण भवति। दृश्यमानश्रुतिपरम्परा सृष्ट्यादौ ब्रह्मणो मुखनि:सृता अद्यापि गुरुशिष्येषु यथापूर्वमविकृता प्रवहति। विभिन्नप्रान्तेभ्य: समागता: समानशाखाध्यायिन: वैदिका: यदा युगपद् एकस्मिन् स्थले वेदपाठं कुर्वन्ति तदा न तेषु कस्यापि कण्ठस्वरस्य, हस्तस्वरस्य, अक्षरस्य, मात्राया अर्धमात्राया वा वैषम्यमवलोक्यते। एतदर्थं अष्टविकृतिपाठानां योगदानं महत्त्वपूर्णं वर्तते। यद्यपि कर्मकाण्डेषु विकृतिपाठानां प्रयोजनं नोपलभ्यते पुनश्च मन्त्रपाठापेक्षया विकृतिपाठ: बहुक्लिष्टतर: श्रमसाध्यश्च वर्तते तथापि वेदपाठसंरक्षणार्थं कठिनपरिश्रमं कृत्वा ऋषय: विकृतिपाठानां समावेशं प्रयत्नपूर्वकं कृतवन्त:।

---

[१९] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[२०] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि, चरणव्यूहसूत्रम्-१/८

[२१] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि

[२२] चरणव्यूहसूत्रम् – १/१०

[२३] सभाष्यशुक्लयजुर्वेदपरिशिष्टानि